# प्राचीनन्यायवैशेषिकम्

| | | | |
|---|---|---|---|
| स्तरः- | शास्त्री | खण्डः- | तृतीयः |
| पत्रम्- | पञ्चमम् | पूर्णाङ्काः- | १०० |
| पाठ्यांशनाम- | न्यायदर्शनाभिमतपदार्थानां परीक्षा | पाठ्यांशसङ्केतः- | प्रा.न्या.४०५ |
| वार्षिकः पाठ्यभारः- | १६० घण्टाः | साप्ताहिकः पाठ्यभारः- | ६ |

## १. पाठ्यांशपरिचयः

पाठ्यांशोऽयं प्राचीनन्यायविषयकच्छात्राणां कृते शास्त्रितृतीयवर्षस्य पञ्चमपत्रत्वेन निर्धारितः । पाठ्यांशेऽस्मिन्न्यायभाष्यस्यद्वितीयाध्यायतःसमाप्तिपर्यन्तं संशयादिपदार्थानां परीक्षा पाठ्यसामग्रीत्वेन सन्निविष्टा ।

पाठ्यांशश्चाऽयं पञ्चसु प्रकरणेषुविभक्तोऽस्ति ।तत्र'**क**'प्रकरणेद्वितीयाध्यायस्थाह्निकद्वयगतैः सभाष्यसूत्रैः कृतासंशयस्य,प्रमाणसामान्यस्य तद्विशेषाणां प्रत्यक्षानुमानोपमानशब्दानां प्रमाणानां परीक्षाविन्यस्तावर्तते ।'**ख**'प्रकरणे न्यायदर्शनस्य तृतीयाध्यायस्थाह्निकद्वयगतैः सभाष्यसूत्रैः विहिता परीक्षानिर्धारितास्ति । '**ग**'प्रकरणे न्यायभाष्यस्यचतुर्थाध्याये निरूपिताप्रवृत्त्यान्तपवर्गपर्यन्तं विहिता परीक्षाउपन्यस्तावर्तते । '**घ**'प्रकरणे न्यायभाष्यस्यपञ्चमाध्यायेनिरूपिताजातिनिग्रहस्थानतद्भेदविशेषपरीक्षानिर्धारिता ।'**ङ**'प्रकरणे तुन्यायसूत्रभाष्यकृतोर्जीवनवृत्तंतदीयसूत्रभाष्यग्रन्थवैशेष्ट्यञ्चनिर्धारितं वर्तते ।

## २. पाठ्यांशस्य सामान्योद्देश्यम्

अस्य पाठ्यांशस्याध्ययनेनच्छात्राः सामान्यतया-

(क) आदौ संशयस्य परीक्षाबीजप्रतिपादनपूर्वकं तस्य, प्रमाणसामान्यस्य तदन्तर्गतानां चतुर्णां प्रमाणानां च परीक्षणे,
(ख) न्यायदर्शनाभिमतात्मादिमनोऽन्तानां प्रमेयाणां परीक्षणे,
(ग) न्यायदर्शनाभिमतप्रवृत्त्याद्यपवर्गान्तपदार्थपरीक्षणे,
(घ) न्यायदर्शनाभिमतयोर्जातिनिग्रहस्थानयोस्तदन्तर्गतभेदानाञ्चलक्षणोदाहरणनिरूपणे,
(ङ) न्यायसूत्रभाष्यकृतोर्जीवनवृत्तवर्णने,तदीयग्रन्थवैशिष्ट्यप्रतिपादने चसमर्था भविष्यन्ति ।

## ३. प्रकरणगतविशिष्टोद्देश्यम्, पाठ्यविषयाः, अङ्काः, पाठघण्टाश्च

| प्रकरणम् | प्रकरणगतविशिष्टोद्देश्यम् | पाठ्यविषयाः | अङ्काः | पाठघण्टाः |
|---|---|---|---|---|
| (क) | न्यायसूत्रगतसंशयादीनां पदार्थानां परीक्षापूर्वकं पृथगुद्देशसार्थक्यवर्णने, संशयस्यप्रमाणसामान्यस्य तद्भेदाद्विशेषाणां प्रत्यक्षानुमानोपमानशब्दनाञ्च परीक्षणे,<br><br>ऐतिह्यसम्भवादीनां प्रमाणान्तरत्वनिरसने, शब्दस्यानित्यत्वसाधने च | न्यायभाष्यस्यद्वितीयाध्याये प्रतिपादितासंशयस्य, प्रमाणसामान्यस्य, तद्भेदानां प्रत्यक्षानुमानोपमानशब्दानाञ्चपरीक्षा । | २५ | ४० |



Thank you for trying PDF Suite

| | | | | |
|---|---|---|---|---|
| | सामर्थ्यसम्पादनम् । | | | |
| (ख) | आत्मनो देहेन्द्रियाद्यतिरिक्तत्वसाधने, आत्मनो नित्यत्वसाधने, शरीरेन्द्रियार्थपरीक्षणे, बुद्धिपरीक्षणे, बुद्धिविषयकसाङ्ख्यमतखण्डने, मनसः परीक्षणे, तस्याणुत्वनिरूपणे, अदृष्टस्य शरीरोत्पत्तिकारणतोपपादने चसामर्थ्यार्जनम् । | न्यायभाष्यस्यतृतीयेऽध्याये प्रतिपादिताआत्मादिप्रमेयपरीक्षा । | २५ | ४० |
| (ग) | प्रवृत्तिदोषप्रेत्यभावपरीक्षणे, व्यक्तादव्यक्तोत्पत्तेः साधने, जगदुत्पत्तिविषये बौद्धवेदान्तिचार्वाकमतखण्डने, तत्त्वज्ञानस्य विषयविवेचने, जल्पादेः तत्त्वज्ञानपरीक्षणावश्यकत्वप्रदर्शने चव्युत्पत्तिसम्पादनम् । | न्यायभाष्यस्यतृतीयेऽध्याये विहिताप्रवृत्त्याद्यपवर्गान्तपरीक्षा, च तत्त्वज्ञानोत्पत्तिसंरक्षणो-पायाश्च । | २० | ३२ |
| (घ) | साधर्म्यसमवैधर्म्यसमादीनां चतुर्विंशतिजातीनामुद्देशलक्षणोदाह-रणपूर्वकंव्याख्यानेऽर्हतार्जनम् । प्रतिज्ञाहान्यादिद्वाविंशतिनिग्रहस्थाना-नामुद्देशलक्षणोदाहरणप्रदर्शने सामर्थ्यार्जनम् । | न्यायभाष्यस्यपञ्चमाध्यायस्थाजातिनिग्रहस्थानतद्भेदविशेष-परीक्षा । | २० | ३२ |
| (ङ) | न्यायसूत्रकृतो गौतमस्यजीवनवृत्तवर्णने, तदीयसूत्रवैशिष्ट्यवर्णने, अथ च न्यायभाष्यकृतो वात्स्यायनस्यजीवनवृत्तवर्णनपूर्वकं तदीयभाष्यग्रन्थवैशेष्ट्यनिरूपणे च सामर्थ्यार्जनम् । | न्यायसूत्रकृतो गौतमस्यजीवनवृत्तम्, तदीयसूत्रवैशिष्ट्यम् । न्यायभाष्यकृतो वात्स्यायनस्यजीवनवृत्तवर्णनम्, तदीयभाष्यग्रन्थवैशिष्ट्यञ्च । | १० | १६ |
| | | | १०० | १६० |

**४. पाठ्यविषयविवरणम्**

**'क'प्रकरणे**

संशयपरीक्षणम्, संशयपरीक्षायाःप्राथम्ये युक्तिः, प्रमाणसामान्यपरीक्षा, प्रत्यक्षप्रमाणपरीक्षा, अवयविपरीक्षा, अनुमानपरीक्षा, वर्तमानकालपरीक्षा, उपमानशब्दप्रमाणपरीक्षा, अर्थवादस्वरूपम्, अनुवादस्य स्वरूपम्, तस्य पुनरुक्तिभिन्नत्वम्, ऐतिह्यसम्भवादीनां प्रमाणान्तरत्वनिरसनम्,शब्दस्यानित्यत्वम्, शब्दनित्यत्ववादनिरसनम्, शब्दपरिमाणवादप्रदूषणम्, पदपदार्थस्वरूपञ्च ।

**'ख'प्रकरणे**

आत्मनो देहेन्द्रियाद्यतिरिक्तत्वम्, आत्मनो नित्यत्वम्, शरीरेन्द्रियार्थपरीक्षा, बुद्धिपरीक्षा, बुद्धिविषयकसाङ्ख्यमतखण्डनम्, मनसः परीक्षा, तस्याणुत्वम्, अदृष्टस्य शरीरोत्पत्तिकारणता, एतद्विषयकसाङ्ख्यजैनमतानिच ।

**'ग'प्रकरणे**



Thank you for trying PDF Suite

प्रवृत्तिदोषप्रेत्यभावपरीक्षा, व्यक्ताद्व्यक्तोत्पत्तिः, जगदुत्पत्तिविषये बौद्धवेदान्ति-चार्वाकमतखण्डनम्, अन्येषां प्रावादुकदार्शनिकानां सर्वानित्यत्ववादसर्वपृथक्त्ववादसर्वशून्यत्ववादसङ्ख्यैकान्त-वादविषयकमतप्रदूषणम्, फलदुःखापवर्गपरीक्षा, तत्त्वज्ञानस्य विषयाः, प्रकारान्तरेणावयविसाधनम्, सर्वाभावात्मकप्रलयखण्डनम्, परमाणुस्वरूपम्, तत्त्वज्ञानोत्पत्तिसाधनम्, यमनियमादीनामपवर्गसाधनत्वम्, जल्पादेस्तत्त्वज्ञानपरीक्षावश्यकत्वम् ।

**'घ'प्रकरणे**

साधर्म्यसमवैधर्म्यसमादयश्चतुर्विंशतिजातयः, तासां भाष्यरीत्योद्देशलक्षणोदाहरणानि, प्रतिज्ञाहानिप्रतिज्ञाविरोधादीनिद्वाविंशतिनिग्रहस्थानानानि, तेषां भाष्यरीत्योद्देशलक्षणोदाहरणानि च ।

**'ङ'प्रकरणे**

न्यायसूत्रकृतो गौतमस्य (अक्षपादस्य)देशकालकृतिसहितं जीवनवृत्तम् । विषयप्रतिपादनशैलीदृष्ट्या न्यायसूत्रवैशिष्ट्यम् । न्यायभाष्यकृतो वात्स्यायनस्यदेशकालकृतिसहितं जीवनवृत्तम् । विषयप्रतिपादनशैलीदृष्ट्या न्यायभाष्यवैशिष्ट्यञ्च ।

## ५. शिक्षणविधिःशैक्षणिकसामग्री च

पाठ्यांशस्यास्य शिक्षणे व्याख्यानप्रश्नोत्तरविश्लेषणनिगमनागमनप्रदर्शनविशेषाःननुनचमूलकाश्चशिक्षणविधयः प्रकरणानुसारेण प्रतिपाद्यविषयानुरूपेण च प्रयोक्तव्याः ।यथासम्भवं शिक्षकैः केवलं मार्गं निर्दिश्य स्वयमेवशिक्षणाय छात्राः प्रेरणीयाः । विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रतिपाद्यविषयानुरूपाणांप्रयोगोऽवलम्बनीयः ।अत्यावश्यके स्थितिविशेषे चान्तर्जालादिमाध्यमेन दूरशिक्षणमपिकर्तुं शक्यम् । तदर्थं सङ्गणकयन्त्रसामग्रीप्रयोक्तव्या । तद्व्यवस्थापनं विद्यापीठेन विधेयम् ।विश्वविद्यालेनविद्यापीठेन वाआवश्यकतानुसारेण प्रयोगात्मककक्षायाव्यवस्थापनं शिक्षकप्रशिक्षणस्य व्यवस्थापनञ्चविधेयम् ।

## ६. मूल्याङ्कनविधिः

आन्तरबाह्यभेदेन मूल्याङ्कनं द्विधाविभज्यते । आन्तरमूल्याङ्कनंकक्षागतम् । पठनपाठनोपस्थितिकक्षाकार्यगृहकार्यपरियोजनाकार्यलिखितपरीक्षोपस्थित्यादिकं विलोक्यसम्बद्धशिक्षकेण विभागसमन्वितकार्ययोजनायाम् आन्तरमूल्याङ्कनं विधेयम् । आन्तरमूल्याङ्कनस्य कृते विंशतिरङ्कानिर्धारिताःसन्ति।बाह्यपरीक्षावर्षान्ते विधीयते । प्रश्नपत्रे बाह्यपरीक्षायाःकृते अशीतिःपूर्णाङ्कानिर्धारिताः ।बाह्यपरीक्षा लेखात्मिकैव भवति ।बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टाः प्रश्नप्रकारा निर्धारिताः सन्ति-

**वार्षिकपरीक्षार्थं प्रश्नपत्रनिर्माणप्रकारविवरणम्**

| प्रकरणानि | प्रश्नप्रकाराः | प्रष्टव्याः प्रश्नसङ्ख्याः | समाधेयाः प्रश्नसङ्ख्याः | प्रतिप्रश्नाङ्काः | पूर्णाङ्काः |
|---|---|---|---|---|---|
| क, ख,ग,घ | विवेचनात्मकाः | ३ | २ | १० | २० |
| क,ख,ग,घ,ङ | सङ्क्षिप्तोत्तरापेक्षिणः | ९ | ६ | ६ | ३६ |
| क,ख,ग,घ,ङ | व्याख्यात्मकाः/वर्णनात्मकाः | ३ | २ | ८ | १६ |
| क,ख,ग,घ,ङ | अतिसङ्क्षिप्तोत्तरापेक्षिणः | ८ | ८ | १ | ८ |
| | योगः | २३ | १८ | | ८० |

**आन्तरमूल्याङ्कनप्रकारविवरणम्–**

| **शीर्षकम्** | **अङ्काः** |
|---|---|
| छात्रोपस्थितिः | ३ |
| कक्षाकार्यकलापः, गृहकार्यञ्च | ३ |
| परियोजनाकार्यम्/प्रतिवेदनलेखनम् | ६ |



Thank you for trying PDF Suite

| | |
|---|---|
| लिखितपरीक्षा | ८ |
| योगः | २० |

**७. पाठ्यसामग्री**

**(क) पाठ्यग्रन्थः**

**न्यायभाष्यम्,**द्वितीयाध्यायतः समाप्तिपर्यन्तम् ।

**(ख) सहायकग्रन्थाः**

वात्स्यायनः **न्यायभाष्यम्,** सुदर्शनाचार्यकृतप्रसन्नपदापरिभूषितम्, अभिनव संस्करण, बौद्धभारती, वाराणसी, सन् १९९८ ।

**(ग) सन्दर्भग्रन्थाः**

केशवमिश्रः **तर्कभाषा**,चिदानन्दसंस्कृतहिन्दीटीकाद्वयोपेता, टीकाकारः श्रीसुरेन्द्रनाथद्विवेदी, भारतीयविद्याप्रकाशन, वाराणसी, सन् १९९७ ।

केशवशरण अर्याल **न्यायसूत्र र वैशेषिकसूत्रको तुलनात्मकपर्यालोचन**, नेपाल प्रज्ञा प्रतिष्ठान,काठमाडौँ, वि.सं.२०७५ ।

गौतमः **न्यायदर्शनम्,** प्रा.पद्मप्रसादभट्टराईकृतभाषानुवादसहितम्, जयतु संस्कृतम्, काठमाडौ, वि.सं. २०६८ ।

**चूडानाथभट्टरायकापौरस्त्य दार्शनिक कृतिहरू**, सम्पादकप्रा.जगत् उपाध्याय'प्रेक्षित', नेपाल प्रज्ञा-प्रतिष्ठान,काठमाडौँ,वि.सं.२०७९ ।

जगदीशभट्टाचार्यः **तर्कामृतम्,** नेपालीभाषानुवादविशेषटिप्पणीसहितम् (अनुवादकतथा टिप्पणीकार-जगत्प्रसादउपाध्याय), विष्णुप्रभा उपाध्याय, काठमाडौँ, वि.सं.२०६७ ।

**दर्शनावली**काविविधभागका सम्बद्ध अंश, नेपाल प्रज्ञा-प्रतिष्ठान, काठमाडौँ ।

**नेपालीदर्शन** सम्पादकप्रा.जगत् उपाध्याय 'प्रेक्षित', नेपाल प्रज्ञा-प्रतिष्ठान,काठमाडौँ, वि.सं.२०७९ ।

फणिभूषण तर्कवागीश **न्यायपरिचय**, चौखम्बाविद्याभवन, वाराणसी, सन् १९६८ ।

शिवहरिमरहट्टा (प्रधानसम्पा.),**आन्वीक्षिकी**, वर्ष १, अङ्क १, वाल्मीकिविद्यापीठन्यायविभाग, काठमाडौ, वि.सं.२०६७ ।

Thank you for trying PDF Suite